गुणकार्यस्य अभ्यासः

१) **सार्वधातुकमपित्** (१.२.४) इति सूत्रस्य व्याख्यां पठित्वा, अवगत्य, तस्य अर्थम् अन्यं कमपि जनं पाठयतु |

**सार्वधातुकमपित्** (१.२.४) = सार्वधातुकं यदपित् तद् ङिद्वत् भवति | सार्वधातुकम् प्रथमान्तम्, अपित् प्रथमान्तं, द्विपदमिदं सूत्रम् | **गाङ्कुटादिभ्योऽञ्णिन्ङित्** (१.२.१) इत्यस्मात् **ङित्** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **सार्वधातुकम् अपित् ङित्** |

२) **क्क्ङिति च** (१.१.५) इति सूत्रस्य व्याख्यां पठित्वा, अवगत्य, तस्य अर्थम् अन्यं कमपि जनं पाठयतु |

**क्क्ङिति च** (१.१.५) = यः प्रत्ययः गित्, कित् अथवा ङित् अस्ति, अपि च तं प्रत्ययं निमित्तीकृत्य इकः स्थाने गुणः अथवा वृद्धिः भवति स्म, सः (गुणः वृद्धिः) न भवति | ग् च क् च ङ् च तेषाम् इतरेतरद्वन्द्वः क्क्ङः; क्क्ङः इतः यस्य सः क्क्ङित्, तस्मिन् परे क्क्ङिति | द्वन्द्वगर्भबहुव्रीहिसमासः | अत्र ग्-स्थाने ककारः **खरि च** इत्यनेन चर्त्वसन्धिः | क्क्ङिति सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको गुणवृद्धी** (१.१.३) इत्यस्य पूर्णतया अनुवृत्तिः; **न धातुलोप आर्धधातुके** (१.१.४) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **क्क्ङिति च इकः गुणवृद्धी न** |

३) एतान् धातून् आधारीकृत्य लट्-लकारस्य प्रथमपुरुषस्य एकवचनान्तरूपं निर्मातु |

- धातुः कस्मिन् गणे अस्ति इति निश्चेतव्यम् |
- विकरणप्रत्ययः कः इति ज्ञातव्यम् |
- निर्माणक्रमस्य प्रत्येकस्मिन् सोपाने सूत्रं किं/सूत्राणि कानि इति वक्तव्यम् |

शुच् →
स्पृश् →
जि →
क्षिप् →
वृत् →
कुच् →
हृ →
क्रीड् →
गुज् →
स्रु →
कृष् →
मिल् →
स्मृ →

Swarup – December 2015